# Gopala Vinshatistotram

# ગોપાલવિંશતિસ્તોત્રમ્

## Document Information

Text title : gopAlavi.nshatistotram

File name : gopaala20.itx

Category : viMshati, vishhnu, krishna, stotra, vedAnta-deshika, vishnu

Location : doc_vishhnu

Author : vedAntadeshika

Proofread by : Balaji

Latest update : November 22, 2001

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

Gopala Vinshatistotram

# ગોપાલવિંશતિસ્તોત્રમ્

શ્રીમાન્ વેંકટનાથાર્યઃ કવિતાર્કિકકેસરી ।
વેદાન્તાચાર્યવર્યો મે સન્નિધત્તાં સદા હૃદિ ॥

વન્દે વૃન્દાવનચરં વલ્લવીજનવલ્લભમ્ ।
જયન્તીસમ્ભવં ધામ વૈજયન્તીવિભૂષણમ્ ॥ ૧॥

વાચં નિજાઙ્કરસિકાં પ્રસમીક્ષમાણો
  વક્ત્રારવિન્દવિનિવેશિતપાંચજન્યઃ ।
વર્ણઃ ત્રિકોણરૂચિરે વરપુણ્ડરીકે
  બદ્ધાસનો જયતિ વલ્લવચક્રવર્તી ॥ ૨॥

આમ્નાયગન્ધરુદિતસ્ફુરિતાધરોષ્ઠમ્
  આસ્રાવિલેક્ષણમનુક્ષણમન્દહાસમ્ ।
ગોપાલડિમ્ભવપુષં કુહના જનન્યાઃ
  પ્રાણસ્તનન્ધયમવૈમિ પરં પુમાંસમ્ ॥ ૩॥

આવિર્ભવત્વનિભૃતાભરણં પુરસ્તાત્
  આકુંચિતૈકચરણ નિભૃહિતાન્યપાદમ્ ।
દધ્નાનિબદ્ધમુખરેણ નિબદ્ધતાલં
  નાથસ્ય નન્દભવને નવનીતનાટ્યમ્ ॥ ૪॥

કુન્દપ્રસૂનવિશદૈર્દશનૈશ્ચતુર્ભિઃ
  સંદશ્ય માતુરનિશં કુચચૂચુકાગ્રમ્ ।
નન્દસ્ય વક્ત્રમવલોકયતો મુરારેર્-
  મન્દસ્થિતં મમમનીષિતમાતનોતુ ॥ ૫॥

હર્તું કુમ્ભે વિનિહિતકરઃ સ્વાદુ હૈયઙ્ગવીનં
  દૃષ્ટ્વા દામગ્રહણચટુલાં માતરં જાતરોષામ્ ।
પાયાદીષત્પ્રચલિતપદૌ નાપગચ્છન્ન તિષ્ઠન્

મિથ્યાગોપઃ સપદિ નયને મીલયન્ વિશ્વગોપ્તા ॥ ૬॥

વ્રજયોષિદપાઙ્ગ વેધનીયં
મથુરાભાગ્યમનન્યભોગ્યમીડે ।
વસુદેવવધૂ સ્તનન્ધયં તદ્-
કિમપિ બ્રહ્મ કિશોરભાવદૃશ્યમ્ ॥ ૮॥

પરિવર્તિતકન્ધરં ભયેન
સ્મિતફુલ્લાધરપલ્લવં સ્મરામિ ।
વિટપિત્વનિરાસકં કયોશ્ચિદ્-
વિપુલોલૂખલકર્ષકં કુમારમ્ ॥ ૯॥

નિકટેષુ નિશામયામિ નિત્યં
નિગમાન્તૈરધુનાઽપિ મૃગ્યમાણમ્ ।
યમલાર્જુનદૃષ્ટબાલકેલિં
યમુનાસાક્ષિકયૌવનં યુવાનમ્ ॥ ૧૦॥

પદવીમદવીયસીં વિમુક્તે-
રટવીં સમ્પદમ્બુ વાહયન્તીમ્ ।
અરુણાધરસાભિલાષવંશાં
કરુણાં કારણમાનુષીં ભજામિ ॥ ૧૧॥

અનિમેષનિવેષણીયમક્ષ્ણો-
રજહદ્યૌવનમાવિરસ્તુ ચિત્તે ।
કલહાયિતકુન્તલં કલાપૈઃ
કરુણોન્માદકવિગ્રહં મહો મે ॥ ૧૨॥

અનુયાયિમનોજ્ઞવંશનાલૈ-
રવતુ સ્પર્શિતવલ્લવીવિમોહૈઃ ।
અનઘસ્મિતશીતલૈરસૌ મામ્
અનુકમ્પાસરિદમ્બુજૈરપાઙ્ગૈઃ ॥ ૧૩॥

અધરાહિતચારુવંશનાલા
મકુટાલમ્બિમયૂરપિઞ્છમાલાઃ ।
હરિનીલશિલાવિભઙ્ગનીલાઃ
પ્રતિભાઃ સન્તુ મમાન્તિમપ્રયાણે ॥ ૧૪॥

અખિલાનવલોકયામિ કાલાન્
   મહિલાદીનભુજાન્તરસ્યૂનઃ ।
અભિલાષપદં વ્રજાઙ્ગનાનામ્
   અભિલાક્રમદૂરમાભિરૂપ્યમ્ ॥ ૧૫॥

મહસે મહિતાય મૌલિના
   વિનતેનાઞ્જલિમઞ્જનત્વિષે ।
કલયામિ વિમુગ્ધવલ્લવી-
   વલયાભાષિતમઞ્જુવેણવે ॥ ૧૬॥

જયતુ લલિતવૃત્તિં શિક્ષિતો વલ્લવીનાં
   શિથિલવલયશિઞ્જાશીતલૈર્હસ્તતાલૈઃ ।
અખિલભુવનરક્ષાગોપવેશસ્ય વિષ્ણો-
   રધરમણિસુધાયામંશવાન્ વંશનાલઃ ॥ ૧૭॥

ચિત્રાકલ્પઃ શ્રવસિ કલયલ્લાઙ્ગલીકર્ણપૂરં
   બર્હોત્તંસસ્ફુરિતચિકુરો બન્ધુજીવં દધાનઃ ।
ગુંજાબદ્ધામુરસિ લલિતાં ધારયન્ હારયષ્ટિં
   ગોપસ્ત્રીણાં જયતિ કિતવઃ કોઽપિ કૌમારહારી ॥ ૧૮॥

લીલાયષ્ટિં કરકિસલયે દક્ષિણે ન્યસ્ત ધન્યા-
   મંસે દેવ્યાઃ પુલકરુચિરે સન્નિવિષ્ટાન્યબાહુઃ ।
મેઘશ્યામો જયતિ લલિતો મેખલાદત્તવેણુ-
   ર્ગુઞ્જાપીડસ્ફુરિતચિકુરો ગોપકન્યાભુજઙ્ગઃ ॥ ૧૯॥

પ્રત્યાલીઢસ્થિતિંઅધિગતાં પ્રાપ્તગાઢાઙ્કપાલીં
   પશ્ચાદીષન્મિલિતનયનાં પ્રેયસીં પ્રેક્ષમાણઃ ।
ભસ્ત્રાયન્ત્રપ્રણિહિતકરો ભક્તજીવાતુરવ્યાદ્
   વારિક્રીડાનિબિડવસનો વલ્લવીવલ્લભો નઃ ॥ ૨૦॥

વાસો હૃત્વા દિનકરસુતાસન્નિધૌ વલ્લવીનાં
   લીલાસ્મેરો જયતિ લલિતામાસ્થિતઃ કુન્દશાખામ્ ।
સવ્રીડાભિસ્તદનુ વસને તાભિરભ્યર્થ્યમાને
   કામી કશ્ચિત્કરકમલયોરઞ્જલિં યાચમાનઃ ॥ ૨૧॥

ઇત્યનન્યમનસા વિનિર્મિતાં
   વેંકટેશકવિના સ્તુતિં પઠન્ ।

દિવ્યવેણુરસિકં સમીક્ષતે
  દૈવતં કિમપિ યૌવતપ્રિયમ્ ॥ ૨૨॥

॥ ઇતિ શ્રીવેદાન્તદેશિકકૃતં ગોપાલવિંશતિસ્તોત્રં સમ્પૂર્ણમ્ ॥

*Gopala Vinshatistotram*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*